अयन्तु यत्कृते यूयं मया शप्ताः स वत्स्यति ।
द्यौस्ततो मानुषे लोके दीर्घकालं स्वकर्म्मणा ॥
नानृतं तच्चिकीर्षामि युष्मान् क्रुद्धो यदब्रवम् ।
न प्रजास्यति चाप्येष मानुषेषु महामनाः ॥
भविष्यति च धर्म्मात्मा सर्व्वशास्त्रविशारदः ।
पितुः प्रियहिते युक्तः स्त्रीभोगान् वर्ज्जयिष्यति ॥”)
तस्याः प्रभावो यथा,—
“वशिष्ठस्याश्रमपदं ब्रह्मस्थानमनुत्तमम् ।
अपश्यज्जयतां श्रेष्ठो विश्वामित्रो महामनाः ॥
ततो वशिष्ठो भगवान् कथान्ते मुनिसत्तमः ।
विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव ॥
आतिथ्यं कर्त्तुमिच्छामि बलस्यास्य महाबल ।
तव चैवाप्रमेयस्य यथार्हं प्रतिगृह्यताम् ॥
बाढ़मित्येव गाधेयो वशिष्ठं प्रत्युवाच ह ।
एवमुक्तो महातेजा वशिष्ठो जपतां वरः ॥
आजुहाव ततः प्रीतः कल्माषीं धूतकल्मषाम् ।
भोजनेन महार्हेण सत्कारं तद्विधत्स्व मे ॥
एवमुक्ता वशिष्ठेन शवला शत्रुसूदन ! ।
विदधे विविधान् कामान् यस्य यस्य यथेप्सितान् ॥
सान्तःपुरजनो राजा सब्राह्मणपुरोहितः ।
युक्तः परमहर्षेण वशिष्ठमिदमब्रवीत् ॥
गवां शतसहस्रेण दीयतां शवला मम ।
एवमुक्तस्तु भगवान् वशिष्ठो मुनिसत्तमः ॥
विश्वामित्रेण धर्म्मात्मा प्रत्युवाच महीपतिम् ।
कारणैर्बहुभी राजन् दास्ये नन्दिनीं तव ॥
कामधेनुं वशिष्ठोऽसौ न तत्याज यदा मुनिः ।
ततोऽस्य शवलां राजा विश्वामित्रस्तदाहरत् ॥
तस्या हुम्भारवाज्जाताः काम्बोजा रविसन्निभाः ।
ऊधसस्त्वभिसंजाताः पह्लवाः शस्त्रपाणयः ॥
योनिदेशाच्च यवनाः शकृद्देशाच्छकास्तथा ।
रोमकूपेषु च म्लेच्छास्तथा रामकिरातकाः ॥
तैस्तन्निसूदितं सैन्यं विश्वामित्रस्य तत्क्षणात् ।
सपदातिगजं साश्वं सरथं रघुनन्दन ! ॥”
इति रामायणे आदिकाण्डम् ॥
(एतद्विवरणं महाभारते । १।१७७ अध्याये च विस्तरशो द्रष्टव्यम् ॥ कन्या यथा, हरिवंशे । १७६ । ७ ।
“मेध्यां गोकुलसम्भूतां नन्दगोपस्य नन्दिनीम् ॥”
आनन्दजननात् पत्न्यपि । यथा, महाभारते । १ । ६६ । १६ ।
“एवं गुणसमायुक्तां वसदे वसुनन्दिनी ।
दर्शयामास राजेन्द्र ! पुरा पौरवनन्दन ! ॥”
“वसुनन्दिनी वसुप्रिया !” इति नीलकण्ठः ॥
स्कन्दानुचरमातृगणविशेषः । यथा, महाभारते । ९ । ४६ । ५ ।
“शृणु मातृगणान् राजन् ! कुमारानुचरानिमान् ॥”
“वसुदामा सुदामा च विशोका नन्दिनी तथा ॥”
तीर्थविशेषः । यथा, महाभारते । ३ । ८४ । १३५ ।
“नान्द्याश्च समासाद्य कूपं देवनिषेवितम् ।
नरमेधस्य यत् पुण्यं तदाप्नोति नराधिप ! ॥”
व्याड़िमुनिमाता । इति हेमचन्द्रः । ३ । ५१६ ॥
पयोदश्यावरवृत्तिविशेषः । अस्य विवरणं छन्दःशब्दे द्रष्टव्यम् । दुर्गा । इयन्तु देविकातटे पीठस्थाने विराजते । यथा, देवीभागवते । ७ । ३१ । ६९ ।
“शिवकुण्डे शुभा नन्दा नन्दिनी देविकातटे ॥”)
नन्दिनीतनयः, पुं, (नन्दिन्यास्तनयः ।) व्याड़िमुनिः । स च अभिधानकारकः । इति हेमचन्द्रः । ३ । ५१६ ॥
नन्दिनीसुतः, पुं, (नन्दिन्याः सुतः ।) व्याड़िमुनिः । इति जटाधरः ॥
नन्दिवर्द्धनः, पुं, (नन्दिं वर्द्धयतीति । वृध + णिच् + ल्युः ।) शिवः । (नन्दिं आनन्दं वर्द्धयतीति ।) पचाद्यन्तः । पुत्रः । इति मेदिनी । ने, २३८ ॥ (यथा, गोः रामायणे । २ । ६६ । १४ ।
“सुषुवे यममित्रघ्नं कौशल्या नन्दिवर्द्धनम् ॥”)
मित्रम् । इति शब्दरत्नावली ॥ (विमानविशेषः । यथा, विश्वकर्म्मप्रकाशे । ६ अध्याये ।
“विमानं छन्दकं तद्वदनेकशिखरान्वितः ।
स चाष्टभूमिकस्तद्वत् सप्ततिर्नन्दिवर्द्धनः ॥”
निमिवंशीयविशेषः । इति भागवतम् । ९ । १३ । १४ ॥) आनन्दवर्द्धके, त्रि ॥ (यथा, हरिवंशे । ६८ । २९ ।
“कृष्ण कृष्ण महाबाहो गोपानां नन्दिवर्द्धन ! ।
दम्यतामेष वै क्षिप्रं सर्पराजो विषायुधः ॥”)
नन्दिवृक्षः, पुं, (नन्दिरानन्दस्तज्जनको वृक्षः । यद्वा, नन्द + इन् । तस्याः वृक्षः ।) नन्दीवृक्षः । इति शब्दरत्नावली ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
“नन्दिवृक्षो मेषशृङ्गी तथा मेषविषाणिका ।
चक्षुर्व्वहनचक्षुश्च मेढ़शृङ्गी गवद्रुमा ॥”)
नन्दी, स्त्री, दुर्गा । यथा, देवीपुराणे ।
“सुराः स्तुवन्ति यया देवा नन्दिनी दुन्दुभिर्मता ।
तेनाथ वादिनी नन्दी दैत्यात्यात् त्रिदशेश्वरी ॥”
नन्दी, [न्] पुं, (नन्द आनन्दोऽस्यास्तीति । इनिः ।) गर्द्दभाण्डवृक्षः । (यथा,—
“करीरं कुलकं नन्दी कुचैला शकुलादनी ।
कठिल्लं केम्बुकं शीतं सकोशातककर्कशम् ॥
तिक्तं पाके कटुग्राही वातलं कफपित्तजित् ॥”
इति वाभटे । १ । ६ अध्याये ॥)
वटवृक्षः । इति मेदिनी । ने, ८२ ॥ शिवगणविशेषः । स च त्रिविधः । यथा,—
“आद्यः कनकनन्दी च गिरिकाख्यो द्वितीयकः ।
सोमनन्दी तृतीयस्तु विज्ञेया नन्दिनस्त्रयः ॥”
इति वह्निपुराणे गणभेदनामाध्यायः ॥
शिवद्वारपालः । स शिवांशः शालङ्कायनमुनिपुत्रः । यथा,—
“अन्यच्च ते प्रवक्ष्यामि परं गुह्यं वसुन्धरे ! ।
सप्यतस्तस्य तु मुनेरीश्वरेण समं सुतम् ॥
तं प्राप्स्यामि परं भावं ज्ञात्वा देवो महेश्वरः ।
सुन्दरत्वपरं रूपं दत्वा दृष्टिसुखावहम् ॥
शालङ्कायनपुत्रत्वं योगमायासमाश्रितः ।
प्राप्नोति तं न जानाति दक्षिणं पार्श्वमाश्रितः ॥
मायायोगबलोपेतस्त्र्यक्षो वै शूलपाणिधृक् ।
रूपवान् गुणवांश्चैव वपुषादित्यसन्निभः ॥
स तं न ज्ञायते जातं ममैवाराधने स्थितः ।
अथ नन्दी प्रहृष्टस्तु महादेवाज्ञया मुनिम् ॥
उत्तिष्ठ मुनिशार्दूल ! सफलस्ते मनोरथः ।
त्वद्दक्षिणाङ्गाज्जातोऽस्मि पुत्रस्ते शाधि मां प्रभो ! ॥
त्वया तपः समारब्धमीश्वरेण समं सुतम् ।
प्राप्स्यामीति ततो मह्यं मद्दशोऽन्यो न कश्चन ॥
विचार्य्येति तदाहं वै जातोऽस्मि स्वयमेव हि ॥”
इति वराहपुराणम् ॥
स एव कल्पान्तरे शिवांशजशिलादमुनेः पुत्रः । यथा,—
“जजाप रुद्रमनिशं यत्र नन्दी महायशाः ।
प्रीतस्तस्य महादेवो देव्या सह पिनाकधृक् ॥
ददौ चात्मसमानत्वं मृत्युवञ्चनमेव च ।
अभूदृषिः स धर्म्मात्मा शिलादो नाम धर्म्मवित् ॥
आराधयन् महादेवं पुत्रार्थं वृषभध्वजम् ।
तस्य वर्षसहस्रान्ते तप्यमानस्य विश्वकृत् ॥
शर्व्वः सोमोपविष्टो वरदोऽस्मीत्यभाषत ।
स वव्रे वरमीशानं वरेण्यं गिरिजापतिम् ॥
अयोनिजं मृत्युहीनं तथा चैवोमया समम् ।
तथास्त्वित्याह भगवान् देव्या सह महेश्वरः ॥
पश्यतस्तस्य विप्रर्षेरन्तर्धानं गतो विभुः ।
ततो यियक्षुः स्वां भूमिं शिलादो धर्म्मवित्तमः ॥
चकर्ष लाङ्गलेनोर्व्वीं भित्त्वादृश्यत शोभनः ।
संवर्त्तकानलप्रख्यः कुमारः प्रहसन्निव ॥
रूपलावण्यसम्पन्नस्तेजसा भासयन् दिशम् ।
कुमारतुल्योऽप्रतिमो मेघगम्भीरया गिरा ॥
शिलादं तात तातेति प्राह नन्दी पुनः पुनः ।
तं दृष्ट्वा नन्दिनं जातं शिलादः परिषस्वजे ॥
मुनिभ्यो दर्शयामास ये तदाश्रमवासिनः ॥”
इति कूर्म्मे ४० अध्यायः ॥
(दिक्सप्ततिसाध्यमौलिककायस्थानामन्यतमः । यथा, घटककारिकायाम् ।
“गुहः कौशिकगोत्रः कुण्डुर्नन्दी शीलो धनुर्गुणः ॥”)
नन्दीमुखी, स्त्री, (नन्दी सुखे यस्याः । ङीष् ।) तन्द्रा । इति हेमचन्द्रः । २ । २२७ ॥
नन्दीवृक्षः, पुं, (नन्दि + वा ङीष् । नन्द्याः वृक्षः । नन्दीजनको वृक्षो वा ।)कोङ्कणदेशप्रसिद्धसुगन्धिवृक्षविशेषः । तत्पर्य्यायः । तूणीकः २ तूणिकः ३ तूणी ४ पीतकः ५ कच्छपः ६ नन्दी ७ कुबेरकः ८ कान्तः ९ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शीतत्वम् । पित्तरक्तदाहशिरोऽर्त्तिखेदकुष्ठनाशित्वम् । सुगन्धित्वम् । पुष्टिवीर्य्यदाहत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अस्याकारः चौरवान् स्वनामप्रसिद्धो वृक्षः । इति भरतः ॥ तुं द इति ख्यातो वृक्ष इति केचित् ॥ तत्पर्य्यायः । तुन्नः २ कुबेरकः ३ कुणिः ४ कच्छः ५ कान्तलकः ६ । इत्यमरः । २।४।१२९ ॥ तुणिः ७ । इति भरतः ॥ नन्दिवृक्षः ८ कूणिः ९ तुन्दः १०